# Shrikrishnokta Jhillira Stotram

# श्रीकृष्णोक्त झिल्लिरास्तोत्रम्

## Document Information

Text title : Shrikrishnokta Jhillira Stotram

File name : jhillirAstotram.itx

Category : aShTottarashatanAma, devii, stotra, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description-comments : Kalivilasatantra

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

# श्रीकृष्णोक्त झिल्लिरास्तोत्रम्

(अथ श्रीकालीविलासतन्त्रे अष्टाविंशतिपटलः ।)
श्रीकृष्ण उवाच ।
हे मातः कथ्यतां नित्यां यदितेऽस्ति दयामयि ।
कदापश्यामि तां राधां कासा राधा कुतस्थितिः ॥ ३७॥

तन्मे कथय हे मातर्हृत्कम्पश्च भवेन्मम ।
राधा राधेति मे चिन्ता सर्वदैव प्रजायते ॥ ३८॥

श्रीकालिकोवाच ।
गोलोकमन्मथे बीजे वैद्युते विन्द् मण्डले ।
यद्विन्दौ सुन्दरी नित्या तत्रराधा विराजते ॥ ३८॥

बिन्दुना शृणु रे पुत्र मर्दिन्या गमनं यतः ।
मर्दिन्या अर्ध सम्भूता चाहं ब्रह्मादिपूजिता ॥ ४०॥

करालवदना काली सुन्दरी चाङ्ग -सम्भवा ।
नमस्ते कालिके मातर्धर्मार्थकाममोक्षदे ॥ ४१॥

दलिताञ्जनसङ्काशे नमस्ते बीजरूपिणि ।
कामरूपे नमस्तुभ्यं नमो मन्मथरूपिणि ॥ ४२॥

कन्दर्परूपिणि मातर्नमस्तुभ्यं नमो नमः ।
ऊँकार रूपिणि तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४३॥

नमस्ते शङ्कराकारे मीनकेतुस्वरूपिणि ।
मायारूपि नमस्तुभ्यं कमला राजरूपिणि ॥ ४४॥

कूर्चराजे नमस्तुभ्यं नमस्ते श्रीस्वरूपिणि ।
वह्निजाया खरूपे त्वं नमस्तुभ्यं नमो नमः ॥ ४५॥

झिल्लिरा रूपिणि तुभ्यं नमस्तुभ्यं नमो नमः ।

श्रुत्वा कृष्णमुखात् स्तोत्रं यदाह कालिका परा ॥ ४६॥

ध्यात्वा मन्त्र जपित्वा च स्तोत्र मेतत्तु यः पठेत् ।
तस्मैतुष्टा च झिल्लीरा प्रसन्ना च प्रसीददति ॥ ४७॥

झिल्लीरा मन्त्रविज्ञानं धानं स्तोत्रं विना तथा ।
यत्किञ्चित् क्रियते कर्म सर्वं भवति निष्फलम् ॥ ४८॥

इति श्रीकालीविलासतन्त्रे श्रीकृष्णोक्त झिल्लिरास्तोत्रं
नामाष्टाविंशतिपटलः समाप्तः ।

Proofread by Rajesh Thyagarajan

*Shrikrishnokta Jhillira Stotram*
pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*